# पाणिनीयतन्त्रे अपाणिनीयसंज्ञा

**Dr. Giridhari Panda**
**Assistant Professor,**
**Department of Sanskrit (UG & PG)**
**Midnapore College (Autonomous)**

**Key Words-** पारिभाषिकशब्दाः, अपाणिनीयसंज्ञाः, पाणिनीयव्याकरणम्, प्राग्पाणिनीयग्रन्थः।

## Abstracts (शोधसारः)-

सूत्रकृता पाणिनिना बहुसूक्ष्मैक्षिकां प्रत्यग्रीकृत्य अष्टाध्याय्याः रचनावैचित्र्यं विषयीकृतम्। पाणिनेः पूर्ववर्तिनि काले ८५ वैयाकरणाः पञ्च अष्टौ नवव्याकरणानि चासन्निति ऐतिह्य प्रकटीकृतं दृश्यते। पाणिनीयरचनायां तेषां प्रभाव: अवश्यम्भवेत् इति अनुशीलनेन प्रतिधातव्यं जायते। तदीयं सूत्रं तदीया शैली, तदीयः पारिभाषिकशब्दः, तदीयम् आनुशासनिकं विवेचनं सर्व लोकविसृतये, तद्कृतस्य व्याकरणस्य च विसृतये ग्रहीतव्यमनुकर्त्तव्यं च भवेत्। अयमेव पन्था कृतिवैचित्र्ये अवलम्बनीयः । किं बहुना सूत्रकारपाणिनिः तद्याकरणस्य परिपृष्टये पारिभाषिकपदविन्यासे च तद्कौशलम् अङ्गीकृतवान्। संज्ञापदेन पारिभाषिकशब्दानामभिज्ञानं इत्यपि भाववैचित्र्यम्। किन्तु संज्ञासंज्ञीभावपुरस्सरं अन्यथा मार्गेण वा पारिभाषिकशब्दानां विवरणं पाणिनीयेषु आचार्येषु लक्षीकृतेषु अनेके पारिभाषिकशब्दाः अपाणिनीयसंज्ञाः वा वर्तन्ते। येषां निर्वचनं पाणिनिना न कृतम् । अनुशीलनेन प्रत्येतव्यं जायते यत् अनेके अपाणिनीया: पारिभाषिकशब्दाः संगृहीताः,येषामुपस्थापनं पाणिनीयव्याकरणे विहितं वद्यते । अनुशीलनेन प्रत्येतव्यं जायते यत् पाणिनीयव्याकरणे उपदेश:, विभक्तिः, संज्ञायाम्, संहिता, आख्यातम्, पुरुषः, प्रातिपदिकम्, उदात्तानुदात्तस्वरित-, लोपः, सवर्ण, आम्रेडितः, उपधा, अपृक्त, विभाषा, आत्मनेपदम्, परस्मैपदम्-इत्यादयः संज्ञासाधनस्य कृते उद्दिष्टाः पारिभाषिकशब्दाः तैत्तरीयोपनिषद्- निरूक्त- सांख्यायनश्रौतसूत्र- वाजसनेयप्रातिशाख्यादिषु अपाणिनीयग्रन्थेष्वपि प्रयुक्ताः आसन् । तथ्यस्यास्योपस्थापनं शास्त्रीयविचारपुरःसरमुपस्थाप्यते।

पदसाधुत्वसम्पादानात्मकमुद्दिष्टमुपदिष्टच व्याकरणं कालेन सूत्रात्मकम् । अद्यत्वे पुनः तत् पाणिनीयम्। सूत्रकृता पाणिनिना बहुसूक्ष्मैक्षिकां प्रत्यग्रीकृत्य अष्टाध्याय्याः रचनावैचित्र्यं विषयीकृतम्। पाणिनेः पूर्ववर्तिनि काले ८५ वैयाकरणाः पञ्च अष्टौ नवव्याकरणानि चासन्निति ऐतिह्य प्रकटीकृतं दृश्यते। पाणिनीयरचनायां तेषां प्रभाव: अवश्यम्भवेत् इति अनुशीलनेन प्रतिधातव्यं जायते। तदीयं सूत्रं तदीया शैली, तदीयः पारिभाषिकशब्दः, तदीयम् आनुशासनिकं विवेचनं सर्व लोकविसृतये, तद्कृतस्य व्याकरणस्य च विसृतये ग्रहीतव्यमनुकर्त्तव्यं च भवेत्। अयमेव पन्था कृतिवैचित्र्ये अवलम्बनीयः । किं बहुना सूत्रकारपाणिनिः तद्याकरणस्य परिपृष्टये पारिभाषिकपदविन्यासे च तद्कौशलम् अङ्गीकृतवान्। संज्ञापदेन पारिभाषिकशब्दानामभिज्ञानं इत्यपि भाववैचित्र्यम्। किन्तु संज्ञासंज्ञीभावपुरस्सरं अन्यथा मार्गेण वा पारिभाषिकशब्दानां विवरणं पाणिनीयेषु आचार्येषु लक्षीकृतेषु अनेके पारिभाषिकशब्दाः अपाणिनीयसंज्ञाः वा वर्तन्ते। येषां निर्वचनं पाणिनिना न कृतम् । अनुशीलनेन प्रत्येतव्यं जायते यत् अनेके अपाणिनीया: पारिभाषिकशब्दाः संगृहीताः,येषामुपस्थापनं पाणिनीयव्याकरणे विहितं वद्यते । तद्यथा -

**उपदेश:-** अयं शब्दः प्रागपाणिनीयकालेऽपि विश्रुतिं गतः आसीत् यस्यार्थः विभिन्नप्रसंगक्रमेण भिन्नता प्राप्तः सन् विचार्यते।

१. तैत्तरीयोपनिषदि शब्दोऽयं शब्दस्वभावत: अनुदेशज्ञानार्थे च प्रयुक्त आसीत्।

२. निरूक्ते निर्देशरूपेऽर्थे अनुदेशरूपेऽर्थे च व्यवहृत आसीत्। यथा चोक्तं वरेभ्य: साक्षात् कृतधर्मेभ्यः उपदेशेन मन्त्रं संप्रददौ।

३. सांख्यायनश्रौतसूत्रे आशयोपस्थापनरूपे अर्थे व्यवहृत आसीत्। तथा हि इति उपदेशतहन्ति।

४. कात्यायनश्रौतसूत्रे अनुदेशरूपार्थे व्यवहृतः।

५. आपस्तम्भश्रौतसूत्रेऽपि एतस्मिन् अनुदेशरूपार्थ व्यवहृतः जातः दृश्यते आम्ना तानि उपदेशात् सरणि।

पंचप्रातिशाख्यसु ग्रन्थेषु ऋकृतन्त्रे उपदेशशब्दः पारिभाषिकशब्दभावेन व्यवहृतः। अतएव प्रतीयते प्राग्पाणिनीयग्रन्थेषु अयमुपदेशशब्द: अनुदेशः, उपदेशः, उच्चारणं, आशयोपस्थापनं, चेत्यादिभावेन व्यवहृतः आसीत्। सूत्रकारः पाणिनिः अस्य व्याख्यानं विधाय अष्टाध्याय्यां साक्षादेकादशवारं प्रयुक्तवान्।

**विभक्तिः-** पाणिनीयतन्त्रे विभक्तिश्च इति सूत्रानुरोधेन 'सुपा तिङा च' विभक्तिसंज्ञायाः विधानात् तस्य स्वरूपं सुपि तिङि च उपतिष्ठते। सुप् इति कथनेन सु-औ-जस्-इति भावेन अष्टादश प्राक्दिशो विभक्तिः[1] इति दिक् शब्देभ्यः सप्तमी, पंचमी, प्रथमाध्य अपि तत् वक्ष्यते। एतत् सर्व प्राचामनुरोधेन कृतमिति विचारयितुं शक्यते। प्रथमतया स्फोटायनवैयाकरणेन सु-औ-जस् इति त्रिकस्य प्रथमादिसंज्ञा उपस्थापिता इति। आचार्यणामुक्त्या उपस्थापयितुं शक्यते। तथाचोक्तं बालमनोरमायाम्- "सूत्रकृता प्रथमादिसंज्ञानामनुक्तत्वात् पाणिनेः पूर्वेषां स्फोटायनादि आचार्याणां शास्त्रे प्रथमाया: सप्तम्यन्ताः संज्ञा स्थिता" इति। काशिकायां तदेव उक्तम्- "प्रथमादयः सप्तम्यन्ताः प्राचां संज्ञाताभि इहापि व्यवहार वृहत्शब्दरत्ने प्रथमा शब्दाः प्रथमा लक्ष्मी, द्वितीया, गौरी इत्यादि इव लोकप्रसिद्धा एव न सांकेतिकी इति कौस्तुभीपितामहचरणाः पाणिन्युत्तरवर्तिन्यिाचार्या स्वभावनया विभक्तेः प्राक्पाणिनीयत्वं प्रतिपादयन्ति।"

**संज्ञायाम्-** संज्ञायामिति पदस्य प्रयोगः अष्टाध्याय्यां प्रथमाध्यायादारभ्य अष्टाध्यायीं यावत् एकसप्ततिसूत्रेषु प्रयोगः दृश्यते। केवलं कुत्रचित् सूत्रस्यादौ, अन्ते च इदं पदं प्रयुक्तं विद्यते। विंशतिसूत्रेषु तस्य आदौ प्रयोगः षट्चत्वारिंशत् सूत्रेषु तस्य अन्ते प्रयोग एवं च पञ्च सूत्राणि सम्पूर्णतया अनेन पदेन विहितानि दृश्यन्ते।

**संहिता-** "परः सन्निकर्ष संहिता"[2] - वर्णानामतिशयितः सन्निधिः संहितासंज्ञा स्यात्। "परः सन्निकर्ष संहिता-इति सूत्रेण विधीयमाना संहितासंज्ञा सान्धि इत्यर्थेन प्रतिपद्यते। सम् पूर्वकात दा धातोः भावे क्तः। सम्धा क्त, भावे क्तस्य

---

1 . पा. सू- 4.1.1

2 . पा.सू. – 1.4.109

नपुंसकत्वेऽपि स्त्रीत्वे टापि संहिताशब्द: सिद्ध्यति। संहिता संधिः इति पर्यायः । "संहितायाम्"[3] इत्यत आरभ्य "पारस्करप्रभृतीनि च[4]" इति अन्ते यावत् अधिकार "तयोरेव वचि संहितायाम्"[5] इत्यत आरभ्य इत्यस्य सम्बन्धः ।

अयं संहिताशब्दः प्राग्पाणिनीयः इति विचारयितुं यायते। निरुक्ते "पदप्रकृतिसंहिता[6]" इति साक्षात् संहिताशब्दस्य प्रयोगः दृश्यते पुचच भावे क्तप्रत्ययस्य नपुंसके प्रयोगः प्रणिनीय अनुशासनेन प्रतिपादनात् स्त्रीलिंगे प्रयोग: कारणान्तरं अन्यथा अन्वेष्टुं न शक्यते। अभेदेन अनुकरणं इति पक्षमादाय अवधीयते संहितायामिति पदस्य प्रयोगः अष्टाध्याय्यां प्राग्पाणिनीयोपन्यासमिति अनुकृत्य प्रतिपादितम्। सन्धिरिति तदर्थवाची शब्दः । संहितापेक्षया लाघवं द्योतयति। लघ्वर्थमध्येयं व्याकरणम् इति भाष्यवचनात् सूत्रकृतां गौरवन्यासे विधानेऽपि अन्यत् किमपि कारणम् आलक्षितं भवेत्।

**आख्यातम् -** आख्यातपदेन क्रियायाः ग्रहणम् इति अयमपि पारिभाषिकः शब्दः पाणिनिना "आख्यातेन आख्यातोपयोगे" इति योगो अस्य प्रयोगः साधितः । निरुक्तकारयास्केन आख्यातपदेन क्रियायाः प्रतिपादनं साधितम् । तथाहि क्रिया आख्यातपदेन क्रियायाः प्रतिपादनं साधयन्ति। तथाहि क्रिया अख्यातपदेन उच्यते "नामाख्यातोपसर्गनिपाताश्च"[7] अपि च भावप्रधानमित्यस्य क्रियाप्रधानमित्यर्थः पूर्वापरीभूतभावमाख्यातपदेन आचष्टे । भाष्यकृता क्रियाप्रधानमाख्यातमिति उक्तम्। कैथटेनापि आख्यातपदवाच्या क्रिया इति उक्तम्। काशिकायां तदेव आख्यातम् आख्यातस्य यथाऽपि क्रियासाधनाय उभयं वाच्यं तथापि तस्य क्रियैव प्रधानार्थः । यजुर्वेद-प्रातिशाख्येऽपि क्रियाप्रधानमाख्यातमिति उक्तम् दर्शनान्तरीयग्रन्थेषु अस्य अन्यथा अर्थः अङ्गीकृत विद्यते। यथा मीमांसका आख्यातशब्द: आख्यातशब्दः तिङ् इति व्यवहरन्ति न्यायवार्तिककार तिङ् पदस्यैव आख्यातत्वमाह भाष्येऽपि पदप्रकारविवेचनावसरे "नामाख्यातोपसर्गनिपाताश्च" इति उक्तम्। भगवत्पाणिनिः "मयूरव्यंसकादयश्च" इति सूत्रस्य गणपाठे तिङन्तमेव आख्यातम् । तदस्तु आख्यातशब्देन व्याकरणे तिङन्तस्य ग्रहणम्। मीमांसादिषु केवलं तिङ्-भावेन ग्रहणम् शास्त्रदृष्ट्या विवेचनम्।

**पुरुष: (प्रथम-मध्यम-उत्तम) -**

अष्टाध्याय्यां अयं शब्दः अक्षरतः न व्यवहृतः । अस्मद्युत्तमः- युष्मद्युपपदे समानाधिकारणे स्थानिन्यापि मध्यमः । शेषे प्रथमः । इति एभिः सूत्रे पुरुषव्यवस्था प्रतिपादिता उत्तम् नाम उत्तमपुरुष इति। एवमन्ये ।

काशिकाकारः स्वकीये व्याख्याने प्रतिपादयति प्रथममध्यमोत्तमाः संज्ञाः भवन्ति । पुनश्च "पुरुष नियमः क्रियते"। इत्यपि व्याख्यातम् । वस्तुगत्या प्रथममध्यमोत्तमा इत्येते शब्दाः विशेषण वाचिकेन अवहार पथे आयात्ति। विना विशेष्यं कदाचित् विशेषणपद अर्थप्रतिपत्तये सार्थक्यं न लभते। आवृत्या अनुवृत्त्या वा तदर्थानुयोगी शब्दविशेष उररीक्रियते। तद्धिया पुरुषशब्दस्य उपस्थापनं एषु सूत्रेषु यर्थाददेश्यम् समिचीनं भवति। पाणिनिः तदेवं प्राग्पाणिनीयेभ्यः अनुकृत्य साधितवान्। कैयटेन प्रतिपादितम्।

---

3 . पा.सू – 6.1.72

4 . पा.सू – 6.1.157

5 . पा.सू – 8.2.108

6 . निरुक्त – 1.17

7 . नि.प्र.ऊ.पू. २

पूर्वाचार्यविहितः गुरुसंज्ञाश्रयणात् यदपाधिनां पूर्वाचार्या संज्ञा व्यधिषत् तदुपाधिमेव एताः भवन्ति । पदमंजर्य्या हरदत्तेनापि उक्तं महत्याः पूर्वाचार्यसंज्ञायाः आश्रयणं तदीय उपाधिपरिग्रहार्थमेव भावः। अतः प्रथममध्यमोत्तम इत्येते शब्दाः शास्त्रीयपुरुषप्रतिपादितार्थप्रसिद्धाः । येन कारणेन प्रथमपुरुष इत्यादि अनुक्त्वा स्वयं पुष्टिं यास्यति इति धीया सूत्रकारः पुरुषशब्दं नोपयोजितवान्।

**प्रातिपदिकम्-**

पाणिनिना प्रातिपदिकम् इति काचित् संज्ञा प्रतिपादिता यस्य कृते सूत्रद्वयं विचारितम्। "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्"[8] "कृत्तद्धितसमासाथ"[9] प्रातिपदिकमिति अन्वर्थसंज्ञा । पदं पदं प्रतिपदं, प्रतिपदे भवं प्रातिपदिकम् वाजसनेयप्रातिशाख्ये- अयं शब्द: कात्यायनेन विचारितः । गोपथब्राह्मणे अयं शब्द: साक्षात् प्रयुक्तः । एतस्मात् प्रतीयते यत् अयं पारिभाषिक शब्दः प्राग्पाणिनीयकृतौ विश्रुतिं गतः यस्य कृते सूत्रकार: अक्षरानुकरणं विहितवान्।

**उदात्तानुदात्तस्वरित-**

अष्टाध्याय्याम् उदात्त-अनुदात-स्वरितसंज्ञा विधानार्थं सूत्रत्रयं विद्यते यथा-

१. "उच्चैरुदात्त: "[10]

२. "निच्चैरनुदात्त: "[11]

३. "समाहार: स्वरित: "[12]

एते त्रयः संज्ञावबोधकाः शब्दाः वाजसनेय-प्रातिशाख्ये अक्षरक्रमेण विद्यन्ते । तथाहि

"उच्चैरुदात्त: " [13]

"नीच्चैरनुदात्त: "[14]

"उभयस्वरित: "[15]

"समाहार: स्वरित: "[16]

---

8 . पा.सू.- 1.2.45

9 . तत्रैव – 1.2.46

10 . तत्रैव – 1.2.29

11 . तत्रैव – 1.2.30

12 . तत्रैव – 1.2.13

13 . वा. प्रा. – 1.108

14 . तत्रैव – 1.109

15 . तत्रैव – 1.14

एन्. ब्लुम्. फिल्ड महोदयाः तदीयायां भाषायां एते शब्दाः प्राग्पाणिनीयाः इति विचार्य प्रतिपादितवन्तः । अतएव विचारेण प्रतिपाद्यते इमे उदात्तादयः शब्दाः ये संज्ञात्वेन अवतीर्णाः ते प्राग्पाणिनीया एव।

काशिकायामपि उदात्तादिशब्दाः प्रसिद्धाः इति उक्तम् ।

**लोपः, सवर्ण, आम्रेडितः, उपधा, अपृक्त, विभाषा, आत्मनेपद, परस्मैपद-**

एते पारिभाषिकशब्दाः संज्ञाविशेषाः यदर्थ पाणिनिना अष्टाध्याय्यां सूत्राणि प्रणीतानि तथाहि-

१. लोपः- "अदर्शन लोपः "[17]

२. सवर्णः- "तुल्यास्य प्रयत्नं सवर्णम् "[18]

३. आम्रेडित- "तस्य परमाम्रेडितम् "[19]

४. उपधा- "अलोऽन्त्यात् पूर्वमुपधा "[20]

५. अपृक्त- "अपृक्त एकालप्रत्ययः "[21]

६. विभाषा- "न वेति विभाषा "[22]एते सर्वे शब्दाः वाजसनेयप्रातिशाख्ये प्रसिद्धिं गता आसन् तथा हि -

लोपः- वा.प्रा. १/१४१

सवर्णः- वा.प्रा. १/१४३

आम्रेडितः - वा. प्रा. ४/९

उपधा - वा. प्रा. ९/३५

अपृक्त- वा. प्रा. ९/१५/१

विभाषा - वेति वैभाषिक तैत्तरीयप्रातिशाख्ये २/२/७

---

16 . तैत्तरीयप्रातिशाख्ये – 1.40

17 . पा.सू. – 1.1.60

18 . पा.सू – 1.1.9

19 . पा.सू – 8.1.2

20 . पा.सू– 1.1.65

21 पा.सू– 1.2.14

22 पा.सू– 1.1.44

एवंभावेन पाणिनीयतन्त्रे प्रयुक्ताः संज्ञाशब्दाः गोपथब्राह्मण-वाजसनेयप्रातिशाख्य-तैत्तरीयप्रातिशाख्य-तैत्तरीयोपनिषद्- निरूक्त- सांख्यायनश्रौतसूत्र- वाजसनेयप्रातिशाख्यादिषु अपाणिनीयग्रन्थेष्वपि प्रयुक्ताः आसन् । अतः पाणिनीयव्याकरणे अपाणिनीयग्रन्थानां प्रभावः नूनमेवासीदिति निश्चयेन वक्तुं शक्यते ।

**सहायकग्रन्थाः**


1. अष्टाध्यायीसूत्रपाठः, दीक्षितपुष्पा, संस्कृतभारती, नवदेहली, २०१० ।

2. लघुशब्देन्दुशेश्वर मिश्रविश्वनाथः पञ्चसन्ध्यन्तः, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली १९९८। ४. ५. वैयाकरणसिद्धान्तकौमुदी, प्रथमभागः, बालमनोरमा तत्वबोधिनी टीका, मोतिलाल बनारसीदास, दिल्ली, २००५।

3. वैयाकरणमहाभाष्यम्, डा. आचार्यसुयुनः रामलाल कपूर ट्रष्ट, रेवलि, सोनीपत, २००८

4. वैयाकरण महाभाष्यम्, मीमांसकयुधिष्ठिर, रामलाल कपूर दृष्ट, रेवलि, सोनीपत, २००८

5. वाक्यपदीयम् ब्रहलकाण्डम् श्री वामदेव आचार्य, चौखम्बा कृष्णदास संस्कृत अकादमी, वाराणसी,१९८७

6. महाभाष्यम्, सम्पादकः- श्रीगुरुप्रसादशास्त्री, राष्ट्रियसंस्कृतसंस्थानम्, नइ देल्ली,२००६

7. वैयाकरणसिद्धान्तकौमुदी, व्याख्याकार पं. बमचन्द्र झा चौखम्बा कृष्णदाम संस्कृत अकादमी, वाराणसी

8. काशिकावृत्ति चौखम्बा कृष्णदास संस्कृत अकादमी, वाराणसी २२१००१

9. परमलघुमञ्जूषा, व्याख्याकारः सम्पादकश्च- डा जयशङ्करलाल त्रिपाठी, चौखम्बा कृष्णदास संस्कृत अकादमी, वाराणसी २२१००१।

10. वैयाकरणसिद्धान्तकौमुदी, व्याख्याकार गोपालदत्तपाण्डेय, चौखम्बा गदास संस्कृत अकादमी, वाराणसी २२१००१।

11. अष्टाध्यायी, ड तपनशङ्करभट्टाचार्य, संस्कृत-बुक-डिपो, कोलकाता. २००४

12. तेत्तरीय-संहिता, चौखम्बा कृष्णदास संस्कृत अकादमी, वाराणमी २२१००१।